# श्री महागणेशपञ्चरत्नस्तोत्रम्

मुदाकरात्त मोदकं सदा विमुक्तिसाधकम् ।
कलाधरावतंसकं विलासि लोकरक्षकम् ।
अनायकैक नायकं विनाशितेभदैत्यकम् ।
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतरातिभीकरम् नवोदितार्कभास्वरम् ।
नमत्सुरारि निर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरम् ।
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्त लोकशङ्करं निरस्तदैत्यकुञ्जरम् ।
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करम् ।
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्तिमार्जनम् चिरन्तनोक्ति भाजनम् ।
पुरारिपूर्व नन्दनं सुरारि गर्वचर्वणम् ।
प्रपञ्च नाशभीषणं धनञ्जयादि भूषणम् ।
कपोलदानवारणं भजे पुराणवारणम् ॥ ४ ॥

VedasOnline

नितान्तकान्तदन्तकान्ति-मन्तकान्तकात्मजम् ।
अचिन्त्य-रूपमन्तहीन-मन्तरायकृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनाम् ।
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

महागणेश पञ्चरत्नमादरेण योऽन्वहम् ।
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रताम् ।
समाहितायु-रष्टभूतिमभ्युपैति सोऽचिरात् ॥ ६ ॥

VedasOnline